तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यते” मनूक्तेः। अत्र सन्मार्गमिति विशेषणात् कदाचारो न धर्म्ममूलमिति गम्यते ततश्च षोड़शिग्रहणाग्रहणयोरुदितानुदितहोमयोः वैकल्पिकयोरेव पित्राद्याचारस्य प्रामाण्यं तदज्ञाने आत्मतुष्टेः इति द्रष्टव्यम्। तदयं निर्गलितार्थः। यत्र श्रुतिस्मृतिद्वैधम् तत्र सदाचारदर्शनेन शास्त्रार्थं निश्चित्य सद्भिराचरितमार्गेणाचरणं प्रथमः कल्पः। तदसम्भवे तु पित्राद्याचारदर्शनेन एकतरपक्षाश्रयणं तस्याप्यज्ञाने आत्मतुष्ट्येत्र तदेवाचरितव्यमिति। यत्र साक्षात् श्रुतिस्मृती मूलं नोपलभ्येते एवं विरुद्धार्थश्रुतिस्मृती वा नोलभ्येते तत्रापि सदाचारस्य धर्ममूलत्वम् “न यत्र साक्षाद्विधयो न निषेधाः श्रुतौ स्मृतौ” इति प्रागुक्तस्कान्दवाक्यात् यत्र तु विरुद्धार्थश्रुतिस्मृती उपलभ्येते तत्र न सदाचारः प्रमाणम् यथा दाक्षिणात्यानां शिष्टानां मातुलकन्यादिपरिणयनाद्याचारः। स त्वनाचारोऽपि तद्देशीयानां स्वल्पदोषायेति व्यवस्थापितमनाचारशब्दे १५७ पृष्ठे दृश्यम्। सदाचारस्य च स्मृतेरिव न साक्षात् श्रुतिकल्पकता किन्तु स्मृतिद्वारैवेति जैमिनीयन्यायमालायां प्रथमाध्याये निरूपितं तत्रैव विस्तरो दृश्यः। एवञ्च श्रुतेः स्मृत्युपजीव्यत्ववत् आचारस्य स्मृत्युपजीव्यतया ततोदुर्ब्बलत्वम् दुर्बलेन च तेन बलीयसोबाधायोगाच्च नाचारेणोपजीव्यजातीयस्मृतिबाधोयुक्तः अतएव जैमिनिना “विरोधे त्वनपेक्षमसति ह्यनुमानमिति” सूत्रे उपजीव्योपजीवकयोर्विरोधे उपजीवकस्यानपेक्षता अननुष्ठानम् असति तु विरोधे उपजीवकेन स्मृत्याचारपदार्थेन उपजीव्ययोः श्रुतिस्मृत्योरनुमानमित्युक्तम्” ततश्च स्मृतिविरोधे आचारस्य न प्रामाण्यमिति स्थितम्। अतएव दुर्बलत्वाभिप्रायेणैव भा० आ० प०। ‘धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः। द्वितीयं धर्मशास्त्रञ्च तृतीयं लोकसंग्रहः” इति लोकाचारस्य तृतीयत्वं, श्रुतेः परमत्वोक्त्या च स्मृतेर्द्वितीयत्वमुक्तम्। स्पष्टमुक्तम्” प्रयो० पा०स्मृतौ। “स्मृतेर्वेदविरोधे तु परित्यागो यथा भवेत्। तथैव लौकिकाचारं स्मृतिबाधे परित्यजेत्” “तदलाभे शिष्टाचारः प्रमाणम्” इति वशिष्टेन शास्त्रालाभे एव शिष्टाचारस्य ग्राह्यताऽभिहिता। शिष्टाचारश्च यद्यपि देशभेदात् नानाविधः तथापि मनुना ब्रह्मावर्त्तदेशीयानामेव पारम्पर्य्यागताचारस्यैव सदाचारतया व्यवस्थापनात् तत्रत्यपारम्पर्य्यक्रमगाताचारएव सदाचारः। ब्रह्मावर्त्तं परिभाष्य यथाह मनुः “तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः। वर्णानां सान्तरलानां स सदाचार उच्यते” इति तथा “कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकाः एष ब्रह्मर्षिदेशोवै ब्रह्मावर्त्तादनन्तरम्। एतद्देशप्रसूतस्य। सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः” इति मनुना ब्रह्मर्षिदेशवासिविप्रसकाशात् सदाचारस्य शिक्षणीयत्वोपदेशात् तद्देशीयाचारोऽपि सदाचार इति गम्यते। सदाचारोऽपि न केवलं शास्त्रामूलकः किन्तु शास्त्रमूलकोऽपि तच्च शास्त्रं मानवादिसंहितादि। तत्र काशीखण्डे शास्त्रमूलकाः सदाचाराः समुच्चित्यप्रशंसापूर्व्वं केचित् दर्शिता यथा।

“लक्षणैः परिहीनोऽपि सम्यगाचारतत्परः। श्रद्धावाननसूयश्च नरोजीवेत्समाः शतम्। दुराचाररतोलोके गर्हणीयः पुमान् भवेत्। व्याधिभिश्चाभिभूयेत तथाल्पायुः सुदुःखभाक्। त्याज्यं कर्म्म पराधीनं कार्य्यमात्मवशं सदा। दुःखी यतः पराधीनः सदैवात्मवशः सुखी। यस्मिन् कर्म्मण्यन्तरात्मा क्रियमाणे प्रसीदति। तदेव कर्म्म कर्त्तव्यं विपरीतं न च क्वचित्। प्रथमं धर्म्मसर्वस्वं प्रोक्ता यन्नियमायमाः। अतस्तेष्वेव वै यत्नः कर्त्तव्योधर्म्ममिच्छता। सत्यं क्षमार्ज्जवं ध्यानमानृशंस्यमहिंसनम्। दमः प्रसादोमाधुर्य्यं मृदुतेति यमा दश। शौचं स्नानं तपोदानं मौनेज्याध्ययनं व्रतम्। उपोसनोपस्थदण्डोदशेति नियमाः स्मृताः। कामं क्रोधं मदं मोहं मात्सर्य्यं लोभमेव च। अमून् षट् वैरिणो जित्वा सर्वत्र विजयी भवेत्। शनैः शनैः सञ्चिनुयाद्धर्म्मं वल्मीकशृङ्गवत्। परपीड़ामकुर्व्वाणः परलोकसहायकः। धर्म्म एव सहायी स्यादमुत्र न परिच्छदः। पितृमातृसुतभ्रातृयोषिद्बन्धुजनादिकः। जायेत चैकलः प्राणी प्रलीयेत तथैकलः। एकलः सुकृतं भुङ्क्तेऽश्नीयाद्दुष्कृतमेकलः। देहं पञ्चत्वमापन्नं त्यक्त्वासौ काष्ठलोष्ठवत्। बान्धवाविमुखायान्ति धर्म्मोयान्तमनुव्रजेत्। नित्यं सञ्चिनुयाद्धर्म्मं ततोऽमुत्र सहायिनम्। धर्म्मं सहायिनं लब्ध्वा सन्तरेद्दुस्तरं तमः। सम्बन्धानाचरेन्नित्यमुत्तमैरुत्तमैः सुधीः। अधमानधमांस्त्यक्त्वा कुलमुत्कर्षतां नयेत्। उत्तमानुत्तमानेव कुर्व्वन् हीनांश्च वर्ज्जयन्। ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम्। अनध्ययनशीलञ्च सदाचारविलङ्घिनम्। अलसं च दुरान्नादं ब्राह्मणं बाधतेऽन्तकः।